# SANSKRIT
# PAPER–III
# OCT–10/07

Signature of Invigilators

1. ................................

2. ................................

Roll No. ☐☐☐☐☐
(In figures as in Admit Card)

Roll. No. ................................

..............................................
(in words)

Name of the Areas/Section (if any)................

**Time Allowed : 2-1/2 hours]** **[Maximum Marks : 200**

**Instructions for the Candidates**

1. Write your Roll Number in the space provided on the top of this page.
2. Write name of your Elective/Section if any.
3. Answer to short answer/essay type questions are to be written in the space provided below each question or after the questions in test booklet itself. No additional sheets are to be used.
4. Read instructions given inside carefully.
5. Last page is attached at the end of the test booklet for rough work.
6. If you write your name or put any special mark on any part of the test booklet which may disclose in any way your identity, you will render yourself liable to disqualification.
7. Use of calculator or any other Electronic Devices is prohibited.
8. There is no negative marking.
9. You should return the test booklet to the invigilator at the end of the examination and should not carry any paper outside the examination hall.

**પરીક્ષાર્થીઓ માટે સૂચનાઓ :**

૧. આ પૃષ્ઠના ઉપલા ભાગે આપેલી જગ્યામાં તમારી ક્રમાંક સંખ્યા (રોલ નંબર) લખો.
૨. તમે જે વિકલ્પનો ઉત્તર આપો તેનો સ્પષ્ટ નિર્દેશ કરો.
૩. ટૂંકનોંધ કે નિબંધ પ્રકારના પ્રશ્નોના ઉત્તર દરેક પ્રશ્નની નીચે આપેલી જગ્યામાં જ લખો. વધારાના કોઈ કાગળનો ઉપયોગ કરશો નહીં.
૪. અંદર આપેલી સૂચનાઓ ધ્યાનથી વાંચો.
૫. આ ઉત્તરપોથીમાં અંતે આપેલું પૃષ્ઠ કાચા કામ માટે છે.
૬. આ ઉત્તરપોથીમાં કયાંય પણ તમારી ઓળખ કરાવી દે એવી રીતે તમારું નામ કે કોઈ ચોકક્સ નિશાની કરી હશે તો તમને આ પરીક્ષા માટે ગેરલાયક ગણવામાં આવશે.
૭. કેલકયુલેટર અથવા ઈલેક્ટ્રોનિકસ સાધનોનો ઉપયોગ કરવો નહીં.
૮. નકારાત્મક ગુણાંક પદ્ધતિ નથી.
૯. પ્રશ્નપત્ર લખાઈ રહે એટલે આ ઉત્તરપોથી તમારા નિરીક્ષકને આપી દેવી. પરીક્ષાખંડની બહાર કોઈ પણ પ્રશ્નપત્ર લઈ જવું નહીં.

**FOR OFFICE USE ONLY**
**MARKS OBTAINED**

| Question Number | Marks Obtained | Question Number | Marks Obtained |
|---|---|---|---|
| 1. | | 11. | |
| 2. | | 12. | |
| 3. | | 13. | |
| 4. | | 14. | |
| 5. | | 15. | |
| 6. | | 16. | |
| 7. | | 17. | |
| 8. | | 18. | |
| 9. | | 19. | |
| 10. | | | |

Total Marks obtained ................................

Signature of the co-ordinator ....................

(Evaluation)

SEAL

# SANSKRIT

## PAPER–III

**सूचना :** अस्मिन् प्रश्नपत्रे **चत्वारो** विभागाः सन्ति । सर्वेषामपि विभागानां **सर्वे** प्रश्नाः समाधेयाः । **संस्कृतभाषायाम्** एव सर्वाणि उत्तराणि लिखन्तु ।

---

### विभागः I

1. अधोलिखितेषु यथेच्छं कम**प्येकं** विषयमाश्रित्य पञ्चशतपरिमितैरेव वचोभिः संस्कृतभाषया निबन्धो लेखनीयः – 20

(A) सहसा विदधीत न क्रियाम् ।

(B) पूर्णता गौरवाय ।

(C) व्यासोच्छिष्टं जगत्सर्वम् ।

(D) शतपुत्रसमो वृक्षः ।

2. अधोलिखितेषु यथेच्छं कम**प्येकं** विषयमाश्रित्य पञ्चशतपरिमितैरेव वचोभि: संस्कृतभाषया निबन्धो लेखनीय: – 20

(A) जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।

(B) काव्यस्यात्मा ध्वनि: ।

(C) संस्कृतस्य भविष्यम् ।

(D) संस्कृते विज्ञानम् ।

## विभागः II

यथेच्छं कस्यापि **एकस्य** वर्गस्य **सर्वे** प्रश्नाः समाधेयाः । त्रिशतसंख्याकैः शब्दैः प्रत्येकः प्रश्नः समाधेयः । [3×15=45]

### वर्गः I

3. पर्जन्यसूक्तस्य वैशिष्ट्यं निरूपयत ।

4. राष्ट्राभिवर्धनसूक्तस्य महत्त्वं प्रतिपादयत ।

5. 'तिस्रो देवताः' – यास्कानुसारं विवेचयत ।

### वर्गः II

3. वाक्यपदीयमाश्रित्य शब्दब्रह्मणः स्वरूपं निरूपयत ।

4. अव्ययीभावस्य लक्षणं विलिख्य यथेच्छं पञ्चभिरुदाहरणैर्विवेचनं कुरुत ।

5. पाणिनीयशिक्षामनुसृत्य वर्णानामुच्चारणस्थानानि निरूपणीयानि ।

### वर्गः III

3. योगसूत्रानुसारेण योगस्य लक्षणं विलिख्य तद्विवेचनं कुरुत ।

4. न्यायसिद्धान्तमुक्तावल्यनुसारं हेत्वाभासाः निरूपणीयाः ।

5. जैनमतानुसारेण स्याद्वादस्य निरूपणं कुरुत ।

### वर्गः IV

3. स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम् ।
   उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ।।
   – मम्मटोक्तदिशा अस्याः कारिकाया व्याख्या विधेया ।

4. कुन्तकोक्तदिशा साहित्यलक्षणं विवेचयत ।

5. पण्डितराजजगन्नाथोक्तमुत्तमोत्तमं काव्यलक्षणं सोदाहरणं विवेचयत ।

**वर्गः V**

3. ब्राह्मीलिपेरुद्गमं विकासं च वर्णयत ।

4. प्रभावतीगुप्तायास्ताम्रलेखस्य प्रतिपाद्यमुपस्थापयत ।

5. मन्दसौरस्तम्भलेखस्य काव्यसौन्दर्यं विवृणुत ।

**प्र. सं. 3. वर्गः ....................**

प्र. सं. 4. वर्गः .....................

**प्र. सं. 5. वर्गः ....................**

## विभागः III

**सर्वे** प्रश्नाः समाधेयाः । पञ्चाशत्परिमितैः शब्दैः प्रत्येकः प्रश्नः समाधेयः । [9×10=90]

6. पुरुषसूक्तस्य दार्शनिकं महत्त्वं प्रतिपादयत ।

7. तैत्तिरीये निर्दिष्टान् पञ्चकोशान् विवृणुत ।

8. षड्भावविकारान् विवृणुत ।

9. महाभाष्योक्तरीत्या शब्दार्थयोः सम्बन्धः प्रतिपादनीयः ।

10. सांख्यकारिकामनुसृत्य पुरुषबहुत्वस्य सिद्धिर्विधेया ।

11. रामायणस्य साहित्यिकं महत्त्वमुपपादयत ।

12. कौटिलीये वर्णितां राजदिनचर्यां स्पष्टयत ।

13. अभिहितान्वयवादान्विताभिधानवादयोर्भेदं निरूपयत ।

14. भरतोक्तं रससूत्रं विवेचयत ।

## विभागः IV

अधस्तनमवतरणमाश्रित्य **सर्वे** प्रश्नाः समाधेयाः । प्रत्येकः प्रश्नः त्रिंशतिपरिमितैरेव शब्दैः समाधेयः – [5×5=25]

नियतिर्विधाय पुंसां प्रथमं सुखमुपरि दारुणं दुःखम् ।

कृत्वा लोकं तरला तडिदिव वज्रं निपातयति ।।

पातयति महापुरुषान्सममेव बहूननादरेणैव ।

परिवर्तमान एकः कालः शैलानिवानन्तः ।।

अथ कदाचिद्राजा राज्यवर्धनं कवचहरमाहूय हूणान्हन्तुं हरिणानिव हरिर्हरिणेशकिशोरमपरिमित-बलानुयातं चिरन्तनैरमात्यैरनुरक्तैश्च महासामन्तैः कृत्वा साभिसरमुत्तरापथं प्राहिणोत् ।

प्रयान्तं च तं देवो हर्षः कतिचित्प्रयाणकानि तुरङ्गैरनुवव्राज । प्रविष्टे च कैलासप्रभाभासिनीं ककुभं भ्रातरि वर्तमानो नवे वयसि विक्रमरसानुरोधिनि केसरिशरभशार्दूलवराहबहुलेषु तुषारशीलोपकण्ठेषूत्कण्ठ-मानवनदेवताकटाक्षांशुशारितशरीरकान्तिः क्रीडन्मृगयां मृगलोचनः कतिपयान्यहानि बहिरेव व्यलम्बत । चकार चाकर्णान्ताकृष्टकार्मुकनिर्गतभासुरभल्लवर्षी स्वल्पीयोभिरेव दिवसैर्निःश्वापदान्यरण्यानि ।

15. नियतिः कथं वज्रं निपातयतीति विवेचनीयम् ।

16. कालकृतं परिवर्तनं निरूपयत ।

17. राजा राज्यवर्धनं किमर्थमुत्तरापथं प्राहिणोत् ?

18. राज्यवर्धनकृतां मृगयां वर्णयत ।

19. अस्यावतरणस्य काव्यसौष्ठवं परिचाययत ।

# ROUGH WORK

SEAL